नं. ~~२४~~

२४६

बोउ म्री कवच

ॐ

षो॰क॰

१

ॐश्रीगणेशायनमः श्रीगुरुभ्योनमः श्रीदेव्युवाच
भगवन्देवदेवेशभक्तानुग्रहकारक श्रीमहाषोडशी
देव्याःकवचंवदमेप्रभो १ श्रीभैरवउवाच अधुनादेविव
क्ष्यामिमहाश्रीषोडशीमयं परमार्थाभिधंवर्मश्रीवि
द्यासारमुत्तमं २ अस्यश्रीमहाषोडशीकवचस्यशि
वऋषिः पंक्तिश्छंदः श्रीमहाषोडशीदेवता कएईल
ह्रींबीजं हसकहलह्रींशक्तिः सकलह्रींकीलकं

धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्तितः अथ
ध्यानं सूर्यकोटिसहस्राभां सर्वाभरणभूषितां पंच
वक्त्रां चतुर्बाहुं शिवशक्त्यात्मकं भजे शिरोऽव्यान्मे रमा
बीजं वाग्बीजं लोचने वतात् पराबीजं श्रुती पायात्का
मबीजं च नासिकां कामराजस्तथोष्ठौ मे शक्तिः पाया
न्मुखं मम वाग्भवा रदनान्पातु तारं जिह्वां मम मावतु
शक्तिः कंठं तथा पातु रमा स्कंधौ मम मावतु ऽहं भुवे

ॐ· सदापातु रतिः पातु करौ मम परा बीजं पातु वक्षो ल
घो·क· क्ष्मीकुक्षिं ममावतु शिवकूटो वतात् पृष्ठं ब्रह्मकूटं तु
२ पार्श्वयोः शक्तिकूटो वतान्नाभिं कान्तिकूटो गुदं तथा
वायुकूटो वताद्धृत् शक्तिकूटस्तु जानुतः तारं जंघे
सदा पातु पादौ शक्तिर्ममावतु परा प्रभाते कालेऽव्या
त् वाङ्मध्याह्ने वताद्रमा सायं पातु सर्वत्र मो
ह्यात्मा निशीथके पूर्वादिदिक्षु तारोऽव्यात् वह्नि

वायोःपातु जलङ्गर्भिन्दारिद्र्यात् शाक्तिपीतु
समानिशं दारापुत्रधनादेर्भोगज्ञाख्यरहंमंडलात्
पातुमेकमलावीजंकामःश्रीयोगिनीगणात् वाग्भ
वंसर्वदापातु श्रीविद्यासर्वतोवतु इतीदंकवचंदिव्यं
महाश्रीषोडशीमयं मूलमंत्रमयंगोप्यं सर्वाशापरि
पूरकं सर्वश्रेयस्करंनित्यं स्तुतंसिद्धिप्रदंकलौ यःप
ठेत्साधकोनित्यंयत्नेमौनव्रतेशिवे सएवषोडशीपुत्रः

ॐ कामेश्वरसमप्रभः श्यामात्मकोमहाकालरूपो
षो॰क॰ वैरिविमर्दनः बहुरुद्रेरमानाथो मांत्रिकोत्तमशेख
३ रः इत्येतत्कथितंवर्म महाश्रीषोडशीमयं विनाने
3 ननसिद्धिःस्यान्ममापिपरमेश्वरि गोप्यंगुह्यतमंवर्म
मूलमंत्रमयंपरं परमार्थाभिधंयस्तुगोपयेत्ससदा
शिवः इतिश्रीरुद्रयामलेतंत्रेमहाषोडशीकवचंसं
पूर्णम श्रीरस्तु